संकटनाशन श्री गणेशस्तोत्र

श्री गणेशाय नमः नारद उवाच

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्
भक्तावासं स्मरेन्नित्यं आयुः कामार्थ सिद्धये ... 1

प्रथमं वक्रतुंडंच एकदंतं द्वितियकम्
तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्थकम् ... 2

लम्बोदरं पंचमंच षष्ठं विकटमेवच
सप्तम् विघ्नराजेन्द्रम् धूम्रवर्ण तथाष्टम् ... 3

नवमं भालचन्द्रंच दशमंतु विनायकम्
एकादशं गणपतिं द्वादशं तु गजनानम् ... 4

द्वादश एतानि नामानि त्रिसंध्ययः पठेन्नरः
न च विघ्नभयं तस्य सर्व सिद्धि करं प्रभो ... 5

विद्यार्थी लभते विद्यां धनार्थी लभते धनम्
पुत्रार्थी लभते पुत्रं मोक्षार्थी लभते गतिम् ... 6

जपेद गणपति स्तोत्रं षडभिर्मासैः फलम् लभेत्
संवत्सरेण सिद्धिं च लभते नात्र संशयः ... 7

अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत्
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ... 8

इति श्रीनारदपुराणे संकटनाशन श्री गणेशस्तोत्रं संपूर्णम्